International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 173-176
© 2018 IJSR
www.anantaajournal.com
Received: 15-05-2018
Accepted: 30-06-2018

**डॉ. पि. नीलकण्ठ:**
सहायकाचार्य:, शैवागम विभाग:, श्री वेंकटेश्वर वेद विश्वविद्यालय: तिरुपति:, आंध्र प्रदेश, भारत

Correspondence
**डॉ. पि. नीलकण्ठ:**
सहायकाचार्य:, शैवागम विभाग:, श्री वेंकटेश्वर वेद विश्वविद्यालय: तिरुपति:, आंध्र प्रदेश, भारत

# अनपत्यता निवारणोपाया:

**डॉ. पि. नीलकण्ठ:**

**सारांश**
मानवजीवने ब्रह्मचर्यादि चतुराश्रमेशु गृहस्थाश्रम: अत्यंत मुख्य: तत्र पितृऋणस्य अपाकरणार्थम् धर्मानुसारम् संतान प्राप्ते: आवश्यकता अतीव वर्तते किन्तु बहुभि: हेतुभि: बहूनां संतान प्राप्ति: न भवनीवर्तते अत: अस्मिन् प्रबंधे वेद, शास्त्र, पुराण, आगमेशु तदर्थ वैदिकोपाया: अत्र परिशील्यन्ते |

**कूटशब्द:** अनपत्यवशात्, लग्नात् पञ्चमे पुत्र स्थाने पापग्रह स्थिते, नारायण बलिः, याज्या पुरोणु वाक्ये, नागबन्ध प्रतिष्ठा, सर्पशान्तिः, वैनतेय इष्टिः, देवपित्रु ऋनाभ्यां विमुक्ताः ।

**प्रस्तावना**

पूर्वजन्म कृत कर्माणि जन्मांतर कारणानि, करणास्तारतम्यानी उत्तमम् मनुष्य जन्म प्राप्यते एवं पूर्वजन्मकृत कर्माग्येव जन्मान्तरीय क्लेशादिनामपि कारणानि. रोग,दारिद्र्य, अनपत्यादि क्लेश अपनोदनाय जन्मराहित्यायच संति बहवोमार्गा: निगामागम, स्मृति, पुराणादिषु क्लेशेषु अत्यंत उत्कृष्ट दुःखावहम् अनपत्यत्वम्. अयं च क्लेश: गार्हस्त्थ्ये अनुभूयमान:.अयंच गृहस्थ आश्रमः सर्वेषां आश्रमाणां आश्रयीभवती ऋणत्रये देव, पितृऋण अपाकरणास्वीकार्योयम् आश्रमः. आश्रमेस्मिन यज्ञेन, देवऋणं प्रजया च पितृऋनं च अपाक्रियते तच्च ऋणत्रयं अवश्यं अपाकर्तव्यं ।

श्लो - ऋणाति त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यधः ।
अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।
इस्ट्वाच शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् । (मनुस्मृति : 6/35-36)

“प्रजायै गृहमेधिनाम्“ इत्यादि वाक्यैश्च आश्रमस्यप्रधान प्रयोजनं धर्मपूजा संपत्तिरेव इत्येव गम्यते तत्रापि पुत्र संततिः पितृऋण विमुक्ति हेतु: सच पुत्रः “पुन्नाम नरकात् त्रायते” इति पुत्र शब्दस्य व्युत्पत्तिः।(पुत्रेण लोकं जयति, पौत्रेण आनञ्चमश्नुते) इति पुराणवचनानि अपि प्रसिद्धानि । पितृभ्यः पञ्चभौतिक शरीरम् प्राप्तः, पुत्र: पितरि अवसानेसति कर्माचरण द्वारा त्यक्त पांचभौतिक शरीरान् पितृन् ऊर्ध्वलोक गमन शक्तियुत देहवतः करोति. तत् कारणेन “ अपुत्रस्य गतिर्नास्ति " इति आभण्यते ।

अस्मिन् संतति विशये महाकवि कालिदासःविरचित रघुवंश महाकाव्ये वसिष्ठ समीपे दिलीपस्य सन्तत्यै अनुग्रह कामना संदर्भे अनपत्यत्व प्रयुक्त क्लेशप्रति पादकानी, संतति प्रयुक्त सुख प्रतिपादकानि दिलीपवाक्यानि षत्सुश्लोकेषु व्यरचयत् । क्लेशप्रतिपादन विषये यदुक्तम् महाराजेन दिलीपेन

श्लो-नूनम् मत्त: परं वंश्या: पिंड विच्छेद दर्शिन: ।
नप्रकाम भुज: श्राध्दे स्वधा संग्रह तत्परा: ।।
(रघुवंश महाकाव्य: प्रथमसर्ग:1/ 66)

अनपत्य वषात् यज्जन्मन: परं पिण्डदायिन; मत्पुत्रा: ना भविश्यन् इति । पिण्डविच्छेद दर्शन: मत्वंश्या: पितरः पुत्रादिना दीयमन स्वधासंग्रह तत्परा अपि आर्धात् पुत्रादिना दियमाने पिण्डादि द्रव्ये तत्परास्सन्तः अपि भाविनिकाले पिण्ड दायि नभविष्यतीति इदानीम् मया दीयमाने द्रवेच नोत्सहन्ते इति।

तथैव सुख विषये

श्लो-लोकान्तर सुखं पुण्यं तपोदन समुद्भवं|
सन्तति शुद्ध वंश्या हि परत्रेह च शर्मणे ॥
(रघुवंश महाकाव्य: प्रथमसर्ग:1/ 69)

तपोदानादिभि: परलोकसुकं प्राप्यते. संतत्याचा ऐहिकम्,पारलौकिकंच उभयं सुखं प्राप्यते इति प्रत्यपादयत् ।

ईदृशी सुखावह संतति: बहुभि: कारणै: गृहस्थै: नप्राप्यते तेषु कारणेषु परिशील्यमानेषु दृश्यते एवं । शैवागमेषु रौरवागमे द्विपंचाशः पटले

सर्पसंहारदोषस्तु कुलक्षय करोभवेत् ।
जन्मांतर सहस्रेषु गूढपाद्ध ननं यदि ।
पुनः पुनश्च दोषाय कल्पते कर्मबंधनात् । इति.

एतेन अवगम्यते अनपत्यत विशये हेतुतम: भवति सर्पवधश्च एवं अस्मीन् जन्मनि जननकाल स्थितग्रह प्रभावोपि संसति राहित्ये कारणं भवती । तथाहि जातकअनुभवसार ग्रंथे पंचम भाव फले

श्लो-पुत्रस्थानं गतेपापे तदीशे नीच संस्थिते ।
शुभदृष्टि विहीनेच वक्तव्या अनपत्यता ।
श्लो-पुत्रस्थानाधिपे सूर्ये व्ययेनीचे यलितेक्षिते ।
कारकेस्तं गते वापि वक्तव्या अनपत्यता ।
इति ।

लग्नात् पंचमे पुत्रस्थाने पाप ग्रहस्थिते, पंचमाधिपतौ नीच स्थिते वा,शुभग्रह दृष्टि अभावे वा अनपत्यता भवति. इतोपि पुत्रस्थानाधीषो रवि: चेत् तस्मिन् व्याये स्थिति रवि: नीचो भूत्वा कुजेन युतोपि, पुत्र कारक: बृहस्पति: अस्तंगतेपि वा अनपत्यता भवति. एवमेव अनैकानि कारणानि ज्योति:शास्त्रे अनपत्यता विषये भणितानिसंति ।

एवं स्त्रीणां रजस्वलाकालोपि संतत्यभावे कारणं, सचकालस्तु प्रथमरज: आर्द्रा नक्षत्र युक्तः कालः, एवं बुध, शुक्र ग्रह सहित नक्षत्र युक्तः कालोवा ।

एवं दुष्टनक्षत्र रजस्वलायां "शौनकप्रोक्त:" भुवनेश्वरी शान्तिः कर्तव्या । तवतापि गर्भोत्पत्ति अभावे प्रतिबन्धकं प्रेतोपद्रवं इतिज्ञात्वा नारायणबलि: नागबलिश्च कार्य: इति धर्म सिन्ध्वादि ग्रंधेषु दृष्यते ।

यादि गर्भधारणानन्तरं गर्भस्रावे सर्पाण्ड नाश: ज्ञेय: तथा च शैवागमे

श्लोक- एकन्ड नागनेचैव एक गर्भविनाशनम् ।

तथा च गणयेद्विद्वान्च्छेयसे बुद्धिविस्तरात् ।। इति

एक सर्पान्ड नशने एक गर्भ स्रावः, अन्डद्वय नशने गर्भद्वयनाश: इत्येवं यथा सङ्खां नाश:.एवं नव मासं गर्भोधृतः जातः पुत्रः मृतश्च तथा इदं सर्प शिशु नाशनं कारणमिति ज्ञेयं. तथाच

श्लो-एकमास शिशौनष्टे एकाब्द शिशुनाशनं ।
मासयुग्म शिशौनष्टेयुग्माब्द शिशुनाशनम् ।।

श्लो-त्रिमासशिशु संहारे अब्दत्रये शिरोर्मृतः ।
एकमासस्य एकाब्दमष्टाभ्दान्तं यथाक्रमम् । इति

एकमास सर्पशिशुनाशनेन एकवत्सर शिशु नाश: द्विमानसर्पशिशु नाशनेन द्विवर्षशिशु नाश: इत्येवं यथाशिशुनाश: ।
एवमेव ज्योतिषग्रन्थेष्वपि (जातक पारिजाते बालारिष्टाद्ध्याये)

श्लो-अद्येचतुश्के जननीकृताघेर्मध्येतु पित्रार्जितपापसंज्ञै:।
बालस्तदन्त्यासु चतुर्शरस्सु स्वाकीय दोषै: समुपैति नशम् |इति ।

जननात् वर्षचतुष्टय पर्यन्तं मातृदोषप्रयुक्त शिशुनाश:,तदनन्तरं अष्ट (८) वर्ष पर्यन्तं पित्रुदोष प्रयुक्त शिशु नाश: ततः द्वादश पर्यन्तम् स्वदोष प्रयुक्त स्वनाश: इतिज्ञेय: ।
एवं प्रकारेण सन्तत्स्यभावे,सन्तति नाशेच इहजन्मनि, जनमन्तरेषु बहूनि करणानि ऊह्यानि, तदपनोदनाय श्रुति स्मृतिपुराण आगमेषु प्रतिपादिता: शान्तयः यथायोग्यम् अनुष्ठेया: ।
तत्र तावत् श्रुतौ :- अग्नये पुत्र वते, इन्द्राय पुत्रिणे इति द्विदेवताका इष्टि: उक्तावर्तते, तत्र अग्नये पुत्रवत इत्यस्य यस्त्वाहृदा, यस्मैत्वं याज्यापुरोनु वाक्वे. इन्द्राय पुत्रिणे इत्यस्य " त्वेसुपुत्रशवस:," उक्थ उक्थे "इति यज्यापुरोनु वाक्ये. इदं केवलं उपलक्षणमात्रमेव।
परमेव वायु:, प्रजापति सुक्तै: क्रियामनेषु पशुयागेशु तथाच देविका हविषां विनियोगे च प्रजाकामस्य इष्टय: यागाश्च निरुपितास्सन्ति अन्तेषु वेदेषु सत्सु केवलं यजुर्वेदीयां तैतरीय शाखायमेव पुरवोक्तेष्टि यागान अतरिच्य बहव्य: इष्टयः बहवः यागाश्चसन्ति एवं सति इतरेषु वेदेषु शखान्तरेषु च बहवः उपाय: भवेयुरिति वेदितव्या: ।
स्मृतौ तावतु बोधायन गृहयसूत्रे प्रजार्थिन: धातु,विधातु, ब्रहाणं शुक्ल,मुद्ग, पीतान्मै: (नैवेद्यादी पूजाम, प्रणवेन अष्टोत्तरशत होम:, धात्रादीनाम अग्नेश्च उपस्थानम्, स्त्रीया: अष्टोत्तर सहस्र संख्यया सावित्री मंत्रै: पलाश पर्ण स्नापनं, पुरुषसूक्त होम:, संपाताज्येन स्त्रीयाश्चमूर्ध्नि होम: इत्येवं प्रकारेण उपाया: निरुपिता

**पुरानेतु**
डोला समन्वित:,बालकस्य सुवर्ण प्रतिमाम्, वृषभम्, सवत्सां स्वर्णधेनुम्, घृतकुम्भम् वाप्रदद्यात् एवञ्च महारुद्र जपः, लक्ष पद्म पुष्पै: शिवार्चनं वा यथाविधि कुर्यादिति स्कान्दपुराणे उक्तम्

श्लो- सौवर्णं बालकं कृत्वा दद्याद्डोला समन्वितम् ।
अथवा वृषभं दद्याद्विप्रोद्वाहनमेव ।।

महारुद्र जपोवापि लक्ष पद्मैशिवार्चनम् ।
स्वर्णधेनु: प्रदातव्या सवत्सावा यथाविधि ।।
घृत कुम्भ प्रदानम् वा संक्षेपादिदमीरितम् ।। ।इति ।

**आगमेषु**
तावत, सन्तान प्राप्तये सर्पशान्तिविधिः, नागबन्ध प्रतिष्ठा च उक्तावर्तते. तत्र सर्वशांति म् अनुष्ठान क्रमस्तु गणपती पपूजादारभ्य पञ्चगव्य स्थापना प्रोक्षणान्तं कृत्वा एला- लवङ्ग- कर्पुर - चन्दन- घृत सयुंतमिश्रेण गुण सयुंतं त्रिप्रस्थ प्रमाण यवतण्ढुल

चूर्णेन सर्वाकृति युग्मं कृत्वा तेनैव अष्टसर्पशिषु आकृतिः शश्ठ्युत्तर शत संख्यया सर्पान्डाकृतिः वृश्चिकं, विशनक्रकं, चत्वारिंशत द्विशतसंख्यया उभयतोमुखी सर्पाकृतिः कृत्वा स्थापयेत् व्रीहि तण्डुल तिल माश धान्य युक्त स्थण्डिल द्वये कर्णिकायुक्त कमल रेखां लिखित्वा तदुपरि यथाविधि कलशद्वयं संस्थप्य तत्तत् देवान् आवाह्य पूजयेत् . रुदु कुम्भे वेददीन्, शतरुद्रीय, पवमान, भूसूक्त अप्रतिरथ सूक्ति, महासौर, बृहत्साम, राथन्तरसाम मन्त्रन् जपेत्।

विष्णुकुम्भे वेदादीन्, विष्णु, श्री पुरुष वरुण सूक्तानि महा नारायण मंत्रान्, वालखिल्यं, आब्लिंगम् जपेत्, ततः समित् चरूअज्यद्रव्यैः अष्टोत्तर शत संख्यया बृहत्तातादि षण्मन्त्रैःजुहुयात् । होमम् समाप्य पिष्ट सर्पान्, पिष्ट सर्पशिशून् पिष्ट अण्डाक्रितीन्,एतान् सर्वान् कुशेन स्प्रिशन् असुन्वन्तम्, मनसोक्ते नमो अस्तु इति त्रिभिर्मन्त्रैः तत्र प्राणान् संस्थाप्य चितिंकृत्त्वा चित्युपरि निक्षिप्य, अब्लिङ्गैः मन्त्रैः मार्जयित्वा होमाग्निना दग्द्वा रुद्र कुम्भ जलेन अभिषिच्य तद्भस्म आदाय महानद्यां प्रक्षिपेत्.

ततः स्नातं यजमानं ऋत्विगादयः विष्णुकुम्भोदकेन वारुणादि मन्त्रादिभिः अबिशिञ्चेत् ततः यजमानः आचार्यादीन् भोजयित्वा सर्पशाप विमुक्तये पायस्विनीं गां, दीपं सुवर्णम्च दद्यात् । ततः ब्राह्मनेभ्यः दशदानानी दक्षिणादींच दद्यात्।

ततः याथाविधि नागप्रतिष्ठा कर्तव्या भवति, एवं कृते शीघ्रमेव जीवपुत्रं लभत इति रौरवआगमे सर्पशान्ति विधौउक्तम्। एवमेव श्री पांचरात्रआगमेपि नारायणसंहितायां इष्टिवैभवकाण्डे पञ्चमाध्याये सन्तान प्राप्त्यर्थं वैनतेयेष्ठिं विहितावर्तते।

एवमेव वैखानसागमेच ध्वजस्थित गरुदस्य निवेदित मन्नं पिण्डं कृत्वा पुत्रार्थिभ्यः स्त्रीभ्यः पुरुषेभ्योवा दत्वा भोजयेच्छेत् ताः पुत्रं प्रसूयेयुः इति निरूपितं अस्ति । एवमेव धर्म सिन्ध्वादि निबन्ध गन्धेश्वपि पुत्रार्थिनं हरि वंश श्रवणादिभिः अभिलाशाष्टक स्तोत्र परायनञ्च उक्तं वर्तते।

## उपसंहार

एतावता पुर्वकालादारभ्य दिलीपादयः अनके अनपत्य करणानि श्रेयस्काम्येभ्यः विज्ञाय तत्परिहारणाय सत्कर्माणि समाचर्य पुत्रवन्ताः अभूवन्निति अवगम्यते। प्रकृत कलेपि नैकाः अपुत्रवन्तोपि परिहार मार्गान् समाश्रित्य इहलोके पुत्र सम्पत्तिम् सम्प्राप्य देव पितृ ऋणाभ्याम् विमुक्ताः भवन्ति इति आशास्य विरम्यते ।

## सन्दर्भ


1. मनुस्मृति (Edited by Dr .L.N. Narasimhacharya, Published by Gayatri trust, Hydrabad-2008)
2. रघुवंश महाकाव्यम् (Published by Gnanasri Aarsha vidya gurukulam, Hydrabad-2008)
3. जातकपारिजातः (Edited by Alladi swaminathan Published by V.V.S public trust, Chennai-2009)
4. रौरवागम (शैवागमः)-Edited by N.R. Bhatt, Published by Institut francais, Pondichery; c1972.
5. स्कान्दपुराणः-Published by Sri Venkateshwara Aarsha Bharathi trust Hydrabad; c1999.
6. कपिंजर संहिता (पाँचरात्रागमः - Published by Sri Venkateshwara vedic university, Tirupati; c2017.
7. विमानार्चना कल्पः-वैखानसागमाः – Published by T.T.D, Tirupati; c1975.
8. बौधायन गृह्यसूत्रः-Edited by Dr .L.N. Narasimhacharya, Published by Gayatri trust, Hydrabad; c2008.
9. कृष्णयजुर्वेदः- Compiler. by Sri Jagannatha rao AV, Published by Jaganatha Ravi, Tamilnadu; c2014.
10. धर्म सिंधुः-Sri Jayalakshmi Publications, Hydrabad; c1999.